# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री गीत गोविंद॥



### ॥ चतुर्थः सर्गः॥(स्निग्धमधुसूदनः)

(अनुष्टुप)

यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम् ।

प्राह प्रेमभरोद्भ्रान्तं(म्) माधवं(म्) राधिकासखी ॥ 1॥

### ॥ गीतम् 8॥

(अथ अष्टमप्रबन्धः(ख्) कर्णाटकरागेण एकतालीताले गीयते)

निन्दति चन्दनमिन्दुकिरणमनु विन्दति खेदमधीरम् ।

व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम् ॥

माधव मनसिजविशिखभयादिव भावनया त्वयि लीना

सा विरहे तव दीना ॥ 1॥

अविरलनिपतितमदनशरादिव भवदवनाय विशालम् ।

स्वहृदयमर्मणी वर्म करोति सजलनलिनीदलजालम्॥ 2॥

सा विरहे तव दीना

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम् ।
व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम् ॥ 3॥
सा विरहे तव दीना

वहति च चलितविलोचनजलभरमाननकमलमुदारम् ।
विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारम् ॥ 4॥
सा विरहे तव दीना

विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम् ।
प्रणमति मकरमधो विनिधाय करे च शरं(न्) नवचूतम् ॥ 5॥
सा विरहे तव दीना

प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहम् ।
त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम्॥ 6॥
सा विरहे तव दीना

ध्यानलयेन पुरः(फ्) परिकल्प्य भवन्तमतीव दुरापम् ।
विलपति हसति विषीदति रोदिति चञ्चति मुञ्चति तापम् ॥ 7॥
सा विरहे तव दीना

श्रीजयदेवभणितमिदमधिकं(यँ) यदि मनसा नटनीयम् ।
हरिविरहाकुलवल्लवयुवतिसखीवचनं(म्) पठनीयम् ॥ 8॥
सा विरहे तव दीना

(शार्दूलविक्रीडितेन)

आवासो विपिनायते प्रियसखीमालापि जालायते
तापोऽपि श्वसितेन दावदहनज्वालाकलापायते ।
सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं(ङ्)
कन्दर्पोऽपि यमायते विरचयन् शार्दूलविक्रीडितम् ॥ 1॥

॥ गीतम् 9 ॥

(अथ नवमः(फ्) प्रबन्धो देशाखरागेण एकतालिताले गीयते)

स्तनविनिहितमपि हारमुदारम् ।
सा मनुते कृशतनुरतिभारम् ॥
राधिका विरहे तव केशव
माधव ! वामन ! विष्णो !॥ 1॥

सरसमसृणमपि मलयजपङ्कम् ।
पश्यति विषमिव वपुषि सशङ्कम् ॥ 2॥ राधिका

श्वसितपवनमनुपमपरिणाहम् ।
मदनदहनमिव वहति सदाहम् ॥ 3॥ राधिका

दिशि दिशि किरति सजलकणजालम् ।
नयननलिनमिव विगलितनालम् ॥ 4॥ राधिका

नयनविषयमपि किसलयतल्पम् ।
कलयति विहितहुताशविकल्पम् ॥ 5॥ राधिका

त्यजति न पाणितलेन कपोलम् ।
बालशशिनमिव सायमलोलम् ॥ 6॥ राधिका

हरिरिति हरिरिति जपति सकामम् ।
विरहविहितमरणेन निकामम् ॥ 7॥ राधिका

श्रीजयदेवभणितमिति गीतम् ।
सुखयतु केशवपदमुपनीतम् ॥ 8॥ राधिका

(शार्दूलविक्रीडितेन)

सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति
ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि ।
एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं(न्) ते रसात्-
स्वर्वैद्यप्रतिम प्रसीदसि यदि त्यक्तोऽन्यथा हस्तकः ॥ 1॥

(त्रिष्टुप)

स्मरातुरां(न्) दैवतवैद्यहृद्य
त्वदङ्गसङ्गामृतमात्रसाध्याम् ।
विमुक्तबाधां(ङ्) कुरुषे न राधा-

मुपेन्द्रवज्रादपि दारुणोऽसि ॥ 2॥

(शार्दूलविक्रीडितेन)

कन्दर्पज्वरसं(ञ्)ज्वरातुर तनोराश्चर्यमस्याश्चिरं(ञ्)
चेतश्चन्दनचन्द्रमः(ख्) कमलिनीचिन्तासु सं(न्)ताम्यति ।
किं(न्)तु क्लान्तिवशेन शीतलतनुं(न्) त्वामेकमेव प्रियं(न्)
ध्यायन्ती रहसि स्थिता कथमपि क्षीणा क्षणं(म्) प्राणिति ॥ 3॥

(पुष्पिताग्रा)

क्षणमपि विरहः(फ्) पुरा न सेहे
नयननिमीलनखिन्नया यया ते ।
श्वसिति कथमसौ रसालशाखां(ञ्)
चिरविरहेण विलोक्य पुष्पिताग्राम् ॥ 4॥

(शार्दूलविक्रीडितेन)

वृष्टिव्याकुलगोकुलावनरसादुद्धृत्य गोवर्धनं(म्)
बिभ्रद्वल्लवसुंदरीभिरधिकानन्दाच्चिरं(ञ्) चुम्बितः ।
कन्दर्पेण तदर्पिताधरतटीसिन्दूरमुद्राङ्कितो
बाहुर्गोपपतेस्तनोतु भवतां(म्) श्रेयां(म्)सि कं(म्)सद्विषः ॥ 5 ॥

॥ इति गीतगोविन्दे स्निग्धमाधवो नाम चतुर्थः सर्गः ॥

